## अनुब्राह्मणादिनिः। (६२/१२७२)

अनुब्राह्मणशब्दात् इनिः प्रत्ययो भवति तदधीते तद्वेद इत्येतस्मिन् [1]विषये। [2]अणोऽपवादः। ब्राह्मण-सदृशोऽयं ग्रन्थः अनुब्राह्मणम्। तदधीते[3] अनुब्राह्मणी। [4]अनुब्राह्मणिनौ, अनुब्राह्मणिनः। [5]मत्त्वर्थेन 'अत इनिठनौ' (५.२.११५/१९२२) इति [6]इनिना सिद्धम्? तत्रैतस्माट् ठन्नपि[7] प्राप्नोति। अनभिधानान् न भविष्यति? अणो निवृत्त्यर्थं तर्हि वचनम्॥

## वसन्तादिभ्यष्ठक्। (६३/१२७३)

वसन्त इत्येवमादिभ्यः ठक् प्रत्ययो भवति तदधीते तद्वेद इत्यस्मिन् [8]विषये। [9]अणोऽपवादः। वसन्त-सहचरितोऽयं ग्रन्थः वसन्तः। तमधीते[10] वासन्तिकः। वार्षिकः[11]।

वसन्त। वर्षाशरदम्। हेमन्त। शिशिर। प्रथम। गुण। [12]चरम। अनुगुण। [13]अपर्वन्। अथर्वन्[14]॥

## प्रोक्ताल् लुक्। (६४/१२७४)

प्रोक्तसहचरितः प्रत्ययः प्रोक्तः। प्रोक्तप्रत्ययान्ताद् अध्येतृवेदित्रोः उत्पन्नस्य[15] लुग् भवति। पाणि-निना प्रोक्तं पाणिनीयम्। तदधीते पाणिनीयः। [16]आपिशलः। स्त्रियां स्वरे च विशेषः। पाणिनीया ब्राह्मणी॥

## सूत्राच्च कोपधात्। (६५/१२७७)

सूत्रवाचिनः ककारोपधाद्[17]उपन्नस्य प्रत्ययस्य लुग् भवति। अप्रोक्तार्थ आरम्भः। पाणिनीयमष्टकं सूत्रम्। तदधीयते अष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः। त्रिकाः काशकृत्स्नाः।

[४२९] सङ्ख्याप्रकृतेरिति वक्तव्यम्। (म. भा. २. २८५)

इह[18] मा भूत्, महावार्त्तिकं [19]सूत्रमधीते माहावार्त्तिकः। कालापकमधीते कालापकः। कोपधात् इति किम्? चतुष्टयमधीते चातुष्टयः॥

## छन्दोब्राह्मणानि च तद्विषयाणि। (६६/१२७८)

प्रोक्तग्रहणमनुवर्तते। छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवन्ति। अध्येतृवेदितृ-प्रत्ययविषयाणि[20]। [21]अनन्यभावो विषयार्थः। तेन स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यं च [22]निवर्तते। कठेन

---

1. अर्थे ह. फ. 2. अणोऽपवादः नास्ति फ. 3. तद् वेद इति वा इत्यधिकम् ग. 4. अनुब्राह्मणिनौ नास्ति फ. 5. ननु इत्यधिकम् फ. 6. इनिः सिद्धः फ. 7. न इत्यधिकम् ह. 8. अर्थे फ. ह. 9. अणोऽपवादः नास्ति फ. 10. वेद वा इत्यधिकम् ड. 11. शारतिकः इत्यधिकम् फ, शारदिकः इत्यधिकम् ग. ह. 12. चरण फ. 13. अपर्वन् फ, अथर्वणः ह, अथर्वन् नास्ति क. 14. प्रथमं भागं विदन् प्राथमिकः। चारमिकः। आनुगुणिकः। काल्पिकः। आथर्वणिकः। इत्यधिकम् ग. 15. प्रत्ययस्य इत्यधिकम् ग. फ. 16. आपिशलं शास्त्रं तदधीते इति इत्यधिकम् ह. 17. अध्येतृवेदित्रोः इत्यधिकम् ह. 18. न भवति फ. 19. सूत्रं नास्ति फ. 20. एव भवन्ति इत्यधिकम् फ. 21. अनन्यत्वं ह. 22. निवर्त्यते ह.